शोध-शीर्षकः

प्रस्थानत्रयेषु ब्रह्मतत्त्वस्य समीक्षात्मकम् अध्ययनम्

राँची विश्वविद्यालये संस्कृतविभागे
विद्यावारिधि(Ph.D)इत्युपाधिप्राप्तये प्रस्तावितः शोधविषयः

मानविकी-संकायः

शोधनिर्देशिका -

डॉ दीपिका टोप्पो ,
असिस्टेंट प्रोफेसर , संस्कृत विभागः ,
डोरंडा महाविद्यालयः ,राँची।

गवेषकः

देवव्रत-वरः

प्रस्तावना -

अस्मिन् जगति सर्वेषु प्राणिषु मध्ये मनवा: श्रेष्ठाः इति कथ्यन्ते । मानव: विवेकवान् , अतः बाह्यवस्तूनि अवलोकनं कृत्वा अवगन्तुं प्रयतन्ते । मानवस्य जिज्ञासाया: कारणात् एवं दर्शनं उत्पन्नम् । प्रायः जगति दृश्यते यत् प्रत्येक: जीवःसुखं प्राप्तुम् इच्छति, दुःखात् मुक्तिं च इच्छति । आत्मनदर्शनेन एवं दुःखात् परममुक्तिः सम्भवति। वेद अपि उच्यते-

"आत्मा वा अरे द्रष्टव्यम्"

अर्थात् आत्मा कथं द्रष्टव्यः इति उक्तम्। एतस्या जिज्ञासायाः समाधानार्थं ऋषि-अनुभवानाम् आधारेण बहवः शास्त्राणि निर्मिताः सन्ति । एतानि शास्त्राणि उच्यन्ते दर्शनशास्त्रम्।

"दृश्यतेऽनेनेतिदर्शनम्" इति विग्रहेन दर्शनार्थक ' दृश् ' धातुना सह करणार्थे 'ल्युट्' प्रत्यय कृत्वा दर्शनम् इति शव्द:निष्पद्यते। यस्य अर्थ: भवति येन माध्यमेन पश्यति स दर्शनम्। एवं दर्शन-शास्त्रस्य व्युत्पत्तिगतार्थः -

" दृश्यते वोध्यतेऽपूर्वोऽर्थोअनेनेति दर्शनम्"

अर्थात् येन माध्यमेन अपूर्वअर्थः वोध्यते स दर्शनम् इति उच्यते।सम्यक् मार्गदर्शनार्थेऽपि दर्शन-शास्त्रस्य भुमिका अस्ति।

यतः जनाः अस्मिन् जगति दृश्यमानं परिवर्तनं दृष्ट्वा तेषां कारणानि ज्ञातुम् इच्छन्ति स्म, तस्मात् दर्शनस्य आरम्भः अभवत् ।कोऽपि दार्शनिकः न केवलं वर्तमानस्य ज्ञानं ज्ञातुम् इच्छति, अपितु भूतकालस्य, भविष्यतकालस्य च विषये सूचनां प्राप्तुम् इच्छति।मानव-जीवनस्य मुख्यं लक्ष्यं मोक्षप्राप्तिः एव,यत् ब्रह्मविद्या-ज्ञानेन प्राप्यते ।सर्वासु विद्यासु मध्ये

इयं ब्रह्म-विद्या श्रेष्ठम्। मुन्डकोपनिषदेऽपि उक्तम् ।

"स ब्रह्मविद्यां सर्वविधा प्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राह"

वेदान्तदर्शनस्य दार्शनिक तत्त्वस्य मूलत त्रयप्रस्थानानि सन्ति। तदर्थम वेदान्तदर्शनस्य ज्ञातार्थ प्रस्थानत्रयस्य ज्ञानम् आवश्यकम् प्रयोजनम् । प्रस्थानत्रयं भवति श्रुतिस्मृतिन्यायश्च। श्रुति प्रस्थानं भवति उपनिषद्, श्रीमदभगवद्गोना, स्मृतिप्रस्थानं भवनि श्रीमद्भगवद्गीता, न्यायप्रस्थानं भवति ब्रह्मसूत्रम्। " **वेदान्त नाम उपनिषद्- प्रमाणं तदुपकारीणि शारीरक - सूत्रादीनि च। "** अत्र आदि पदेन श्रीमद्भगवद्गीता उपनिषत् च वोद्धव्य, तस्य प्रमाणम् -

सर्वोपनिषदोगावो दोगा गौपालनन्दनः ।
प्रार्थवित् स सुधीभोवतो दुद्धं गोतामनं महत् ।।

प्रस्थानत्रयेषु उपनिषदेव मूलम, अनेकाः उपनिषदः सन्ति, तप, मध्ये द्वादशः प्राचिन उपनिषदः सन्ति। द्वादशः प्राचिन उपनिषतः एव ऐतरेय, कौषोनको, छान्दोग्य, केन, तैत्तिरीय, कठ, श्वेताश्वतर, ईश; बृहदारण्यक, प्रश्न, मुण्डक, माण्डुकश्च।एतेषामुपनिषदामुपरि शङ्कराचार्येण भाष्यं कृतम्। एतस्मात् कारणात मया द्वादश उपनिषतिउपरि ब्रह्मतत्त्वस्य विचार्य करिष्यते।

प्रस्थान्त्रयोषु श्रेष्ठं ग्रन्यं ब्रद्ध। सूत्रम्। ब्रह्मसूत्रस्थ नामान्तरानि वेदान्तसूत्रम्, शारीरर्कसूत्रम्, शारीरक मिमांशा, उत्तर मिमांशाचेति, न्यायेन आत्मतत्त्व प्रतिपादितुं ब्रह्मसूत्रं न्याय प्रस्थानम उच्यते।

श्रुतिप्रस्थाने ब्रह्मतत्त्वस्य विचार:

वेदान्ते ब्रह्म वा आत्मा वा अर्थमेकं गृहीतम् । वृहदारण्यकोपनिषदि महर्षिणा याज्ञवल्क्येन उक्तवान् - "अयमात्मा ब्रह्म", ब्रह्म शब्दस्य अर्थमेव व्यपकत्ववाचकम्, बृह + मन् = ब्रह्म । 'बृह्' धातुनार्थं व्यापकं, अतिशायिकः इति अर्थेण 'मन्' प्रत्यय व्यवहृतः । अर्थात् ब्रह्म शब्दस्य अर्थमेव यत् व्यापकतमं महत्तमं, यत् जीवजगतस्य परमतत्त्वम् । विश्वप्रपञ्चस्य सर्वापेक्षा बृहत्तमं महत्तमं च एव ब्रह्म वा आत्मा वा । ऋषिप्रवरः अङ्गिरसः ब्रह्मजिज्ञासु शौनकं प्रति आत्मनः सर्वव्यापकत्वं व्याख्यावसरे वदति

"ब्रह्मैवेदममृतं पुरस्ताद् ब्रह्म पश्चात् ब्रह्मदक्षिणतश्चोत्तरेण ।
अधश्चोर्ध्वञ्च प्रसृतं ब्रह्मैवेदं विश्वमिदं वारिश्यम्" ।॥

उपनिषदि आत्मनः वा ब्रह्मणः वा द्वे लक्षणे वर्तते, स्वरूपलक्षणं तटस्थलक्षणं च । येन लक्षणेन पदार्थस्य प्रकृतः स्वरूपं ज्ञातव्यं तत् ब्रह्मणः स्वरूपलक्षणम् । ब्रह्म निर्गुणं च निर्विशेषं च निष्क्रियं च अन्वयं च चैतन्यं च, एतानि सर्वाणि ब्रह्मणः स्वरूपलक्षणम् । ब्रह्म जगतस्य स्रष्टां च पालकं च संहारकं च, एतानि सर्वाणि ब्रह्मणः तटस्थलक्षणम् ।

ब्रह्म निरुपाधिकम् । ब्रह्मणः कोऽपि उपाधि नास्ति । ब्रह्म द्रव्यं न भवति । द्रव्यस्य दैशिकावस्थानं विद्यते । किन्तु, ब्रह्म देशकालातीतसर्वव्यापकं सर्वगामी, ब्रह्म अनिर्वचनीयं कोऽपि शब्देन वा वाक्येन ब्रह्म न प्रकाशयितुम् । ब्रह्मणः कोऽपि स्वजातीयं वा विजातीयं वा स्वगतभेदं नास्ति ।

केनोपनिषदि उक्तं यत् -

“श्रोत्रस्य श्रोत्रं मनसो मनो यद्वायोऽवाचं सप्राणस्यप्राणः।
चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्यास्माल्लोकादमृता भवन्ति” ॥ (केन. -१/२)

ब्रह्म सच्चिदानन्दस्वरूपम् । सच्चिदानन्दाय आत्मने पति-पत्न्याः, पत्नी-पत्यु, पुत्र-पितु, पिता-पुत्रस्य प्रियो भवति । आत्मप्रीते वित्तं, क्षत्रियं, देवतां भूतसर्वं प्रियो भवति । अयमात्मा अवाङ्गनसगोचरम्, तत् न द्रष्टव्यं आन्तर्ग्रह्यं च । एतत् प्रसङ्गे 'निर्वाषटकं' ग्रन्थे आचार्यः शङ्करः अवदत्-

न मेमृत्युशङ्का न मे जातिभेद:

पिता नैव में नैव माता न जन्म।

न वन्धु न मित्रं गुरुर्नैव शिष्य:

चइदआनन्दस्वरूप: शिवोऽहं शिवोऽहम्।।

ब्रह्म सत्यस्वरूपम् । छान्दग्योपनिषदि उक्तं यत् - “तस्य वा एतस्य ब्रह्मणो नाम सत्यम्” । बृहदारण्यकोपनिषदि ब्रह्म सत्यस्य सत्यमिति उक्तं - "तस्योपनिषद् सत्यस्य सत्यमिति प्राणा वै सत्यं तेषामेव सत्यम्” । एतत् सत्यं स्वरूपं ब्रह्म जगतप्रपञ्चे सर्वत्र विद्यते ।

सैन्धवखण्डे यथा सर्वत्र लवनास्वादितः तथा जगत्प्रपञ्चस्य प्रज्ञानघनमात्मा समभावेन विद्यते । यथा अग्ने स्फुलिङ्ग साधारणभावेन निर्गतः भवति तथा परमात्मनि जगतं जीवनं च प्रकाशयतः ।

इदं ब्रह्मज्ञानं साधारणमनुष्यानां समीपे अतीव दुर्लभम् । श्रवण-मनन-निदिध्यासनैः आत्मनः प्रकृतस्वरूपलब्धिं करिष्यति । "सर्वं खल्विदं ब्रह्म" ब्रह्म एव जगत् । इदं ज्ञानं पूर्णज्ञानं, पूर्णज्ञानेन जीवस्य ब्रह्मस्वरूपतां लभते । तदा जीवो ब्रह्म च एकम् - "जीवो ब्रह्मैव नापरः" । आत्मज्ञानस्य वक्ता यथा दुर्लभः तथा श्रोताऽपि दुर्लभः । कठोपनिषदि उक्तम् -

"श्रवणायापि वहुभिर्यो न लभ्यः शृण्वन्तोऽपि वहवो यं न विद्युः ।

आश्चर्यो वक्ता कुशलोऽस्य लब्धाऽश्चर्यो ज्ञाता कुशलानुशिष्टः" ॥ (२/७)

आत्मतत्त्वं बहवः नराः श्रवणं न प्राप्नन्ति । श्रुत्वा बहुभिः नरैः तस्य स्वरूपं न ज्ञातव्यम् । तत् आत्मतत्त्वस्य वक्ता दुर्लभः । इदमात्मज्ञानम् अति निष्णात नरैः लभ्यते । निपुनेन आचार्येण आत्मतत्त्वोपदेशं लभ्यते, किन्तु अयं श्रोता हि दुर्लभः ।

स्मृतिप्रस्थाने ब्रह्मतत्त्वस्य विचार:

गीतायाः अधिकांशे श्लोके अत्मण: अस्तित्वं दर्शयन्ति। वेदान्तभाष्यकारै : भगवद्गीतायां आत्माण: भिन्नाः अवधारणाः दत्ताः सन्ति । गीतायां द्वितीयाध्याये आष्टादशतम श्लोके अत्मतत्व स्वरूप विषये चर्चा कृता अस्ति.-

अन्तवन्त इमेदेहा नित्यस्योक्ता: शरईरइन:

अनाशिनोऽप्रमेयस्य तस्माद् युद्धस्य भारत।।

ब्रह्म अविनाशी अप्रमेयश्च मनवुद्धिभ्यांम न ज्ञायने। इतोऽपि गीतायां आत्मनः नित्यत्व विषये कथ्यते -

न जायते म्रियते वा कदाचित् नायं भूत्वाऽभावित वान भूयः।

अजो नित्य शाश्वतोऽयं पुरानो नहन्यते हन्यमाने शरीरे ॥

अर्थात् अयं आत्मा कदापि न जायते न म्रियते । किंवा जात्वापि पुनः न तिष्ठति। अयं आत्मा जन्मरहित, सदा समानरूपेण विराजते।वृद्धदेहस्य विनाशेऽपि आत्मा कदापि न विनश्यति।परमात्मनः श्रेष्ठत्व प्रतिपादने गीतायाम् उक्तम् -

इन्द्रियानि परान्याहुरिन्द्रियेभ्यः परं मनः।

मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्त सः।"

अर्थात् देहतः इन्द्रियानि श्रेष्ठ । इन्द्रियेषु मनः श्रेष्ठः। मनतः बुद्धि श्रेष्ठ, यः वुद्धेर्पेक्षयापि श्रेष्ठतरः स परमात्मा, आत्मा स्वयंमेव स्वतन्त्ररूपेण शरीरे विराजते। आत्मा निर्गुणः भूत्वापि सत्यादिगुणत्रयस्य प्रतिपादकः।

सर्व्वोन्द्रियगुणभास्यं सर्वोन्द्रियविवर्ज्जितम्।

असक्तं सर्व्वभृचैव निर्गुनं गुनभोक्तृच ।"

• न्याय प्रस्थाने ब्रह्म तत्त्वस्य विचारः

यज्ञादि फलम् अनित्यत्वात् एतस्मात् कारणान् मानवाः दुःखेन पुनः पतितवन्तः । तदर्श केनोपायेन दुःखस्य आत्यन्तिकं निवृत्ति सम्भवति तस्य

विचार्य कर्तव्यम्। तदर्थ ब्रह्मसूत्रकारेण प्रथमसूत्रे आत्यन्तिक दुःखं निवृत्तार्थं ब्रह्मविचार्यं क्रियते तस्य प्रमाणम् - "अथातो ब्रह्मजिज्ञासा " ब्रह्मणः स्वरूपं वर्णयति- 'जन्मादयस्य यतः' इति सूत्रेण, अत्र सूत्रकारेण ब्रह्मनं जगतः कारणरूपेण वर्णयति । यस्मात् जगतः उत्पत्ति -स्थिति-विलयश्च स एव ब्रह्म एवं प्रकारेण ब्रह्मणस्वरूपं वर्णयति अस्मिन् सूत्रे ।

ब्रह्मण केन प्रकारेण ज्ञायते, एतस्य प्रश्नस्योत्तरे सूत्रकारेण सूत्रं क्रियते - शास्त्रयोनित्वात' अत्र 'शास्त्र' इति पदेन उपनिषदादि वोध्यते ।

आनन्दमयाधिकरणे प्रथमसूत्र ब्रह्माणम् आनन्दस्वरूपेण वर्णयति सूत्रकारेण उत्तम्- आनन्दमयोऽभ्यासात्' ब्रह्मणः आनन्दस्वरूपस्थ प्रमाणम् एव वृहदारण्यकोपनिषदि - "विज्ञानमानन्दं ब्रह्म इति"। तैत्तिरीयोपनिषदि - "आनन्दो ब्रह्मेति व्यजानात्"। मुण्डकोपनिषदि-"आनन्दरुपममृतं यद्विभाति" इति।

वेदान्तसारग्रन्ये मङ्गलाचरणे ब्रह्मणस्वरूप प्रसङे सम्यकरूपेण वर्णयति,-

अखण्ड सच्चिदानन्दमवाङ्मनसगोचरम्

आत्मानमखिलाधारमाश्रियेऽभिष्टसिद्धये ॥

मङ्गल श्लोकेस्मिन ब्रह्मास्य चत्वारः हेतवः।ग्रन्थकारादौ 'अखण्डम्' इति पदम् उल्लिखितम्।अत्र अखण्ड: शव्द: ब्रह्मस्य विशेषणम् पदम् अस्ति।खण्ड शव्दस्य अर्थः भवति भेदः । यत् मेदः त्रयीकालिकाभाव तत् अखण्डम्। अयं ब्रह्मनं कोऽपि खण्डणं कर्तुं न शक्नोति।अतः ब्रह्म अखण्डम् ।ग्रन्थकार ब्रह्मणं 'सचिदानन्द' इति उक्तम्। उक्तेस्मिन् पदत्रयम् अस्ति यथा-

सत्-चित्-आनन्दश्च, सत्य-ब्रह्मणयोर्मध्ये अभिन्न सम्बन्ध अस्ति। चित् इत्युक्ते ज्ञानम्। ब्रह्मज्ञानयोर्मध्ये कोऽपि भेदः नास्ति। तथैव ब्रह्म्आनन्दयोर्मध्येऽपि भिन्नता नस्ति। अतः ब्रह्मनः सचिदानन्द स्वरूपास्ति। ग्रन्यकारः ब्रह्मस्य विशेषणपदरूपेण-'अवाङमनसगोचरम्' इति पदम उक्तम । अर्थात् वाङ्मनसाभ्यां कोऽपि ब्रह्मनम् उपलवद्धिं कर्तुं न शक्नोति, वाक् तथा मन प्रकृतितः जातः वस्तुनि ग्रहितुं शक्नोति न तु अप्रकृतिजातः। अतः ब्रह्मऽपि अलौकिकः वस्तुः तदर्थं इन्द्रियेण न ज्ञायते। सर्वान्ते शङ्कराचार्येण ब्रह्मस्य स्वरूप विषये उक्तम्- 'अखिलाधारम्' ब्रह्म अखिलप्रपञ्चस्य आधारः स्वरूपः, अत्र आधारः शव्दस्यार्थं भवति सृष्टि। अतएव जगतस्य उत्पत्ति-स्थिति-प्रलयश्च कारणम् भवति ब्रह्म, एवं प्रकारेण ब्रह्मस्य स्वरूप विषये मङ्गल श्लोके उक्तम्।

• शोधस्योद्देश्यानि :-

(i) वेदान्तदर्शनस्य दार्शनिकतत्त्वस्य मूलतः त्रयप्रस्थानानि सन्ति, तदर्थं वेदान्तदर्शनस्य ज्ञातार्थं प्रस्थानत्रयस्य ज्ञानम् आवश्यकम्।

(ii) मानवाः दुखान् किमप्रकारेण मुक्ति सम्भवति मुक्ति तत् विचार्यते।

(iii)ब्रह्मणः साकारनिराकारायोश्च वर्णयति।

(iv) भगवता श्रीकृष्णेन दुखात् मुक्ति विषये विचारम्।

(v) ब्रह्मसूत्रे ब्रह्मणः स्वरूपं विचारम्।

(vi)उपनिषदि महावाक्यार्थ विचारम् ।

• प्रथम अध्याय :- प्रस्थानत्रयेषु सामान्यः परिचयः।

(i) उपनिषदः सामान्यः परिचयः।

(ii) भगवद्गीतायाः सामान्यः परिचयः।

(iii) ब्रह्मसूत्रस्य सामान्यः परिचयः।

• द्वितीय अध्याय :- आस्तिकदर्शने प्रस्थानत्रयस्य प्रभावः-

(i) सांख्य- योगदर्शनयोः प्रभावः।

(ii) न्याय- वैशेषिकदर्शनयोः प्रभावः।

(iii) मिमांसा- वेदान्तदर्शनयोः प्रभावः।

• तृतीय अध्याय : उपनिषदि महावाक्ये ब्रह्मतत्त्वस्य विचारम् -

(i)' प्रज्ञानब्रह्म' इति महावाक्यस्य विचारः ।

(ii) 'तत्त्वमसि' इति महावाक्यस्य विचारः।

(iii) 'अहं ब्रह्मास्मि' इति महावाक्यस्य विचारः।

(iv)' अयं आत्मा ब्रह्मः' इति महावाक्यस्य विचारः।

(v) अन्यमहावाक्येषु विचारः।

• चतुर्थ अध्यायः - श्रीमद्भगवद्गीतायाम् ब्रह्मतत्त्वस्य विचारः

(i) मायावादस्य विचारः।

(ii) स्वगुणः ब्रह्मः विचारः ।

(iii) निर्गुणः ब्रह्मः विचारः।

पञ्चम् अध्याय : ब्रह्मसूत्रे ब्रह्मतत्त्वस्य विचारः।

(i) समन्वय अध्याये ब्रह्मतत्त्वस्य विचारः।

(ii) अविरोधाध्याये ब्रह्मतत्त्वस्य विचारः।

(iii) साधनाध्याये ब्रह्मतत्त्वस्य बिचारः।

(iv) फलाध्याये ब्रद्यातत्त्वस्य विचारः

सहायक ग्रन्थसूची

1. भारतीय दर्शन परइचय- अध्यापक यदुपति-त्रिपाठी, संस्कृत पुस्तक भण्डार,2016

2. भारतीय दर्शन - ड: विपद्भञ्जन पाल , संस्कृत पुस्तक भण्डार, 2016

3. वेदान्तसार: - ड: विपद्भञ्जन पाल, संस्कृत पुस्तक भण्डार, 2016

4. वेदान्तसार:- स्वामी अमृतत्वानन्द, उद्बोधन कार्यालय, 2016

5. ब्रह्मसूत्र- स्वामी वीरेश्वरानन्द, उद्बोधन कार्यालय,2016

6. उपनिषद् - गीताप्रेस, गोरक्षपुर

7.श्रीगीता- पण्डित श्रीहेमचन्द्र भट्टाचार्य, श्री दिलीप मुखोपाध्याय, अक्षय लाइब्रेरी ,2016